# Sri Ramanuja Mission of Srirangam Srimath Andavan Asramam



With the Blessings of His Holiness, Srimath Andavan
Sri Ranga Ramanuja Maha Desikan
of Srirangam Srimath Andavan Asramam

**Stotravali composed by**

**Srimath Srimushnam Andavan**
**Sri Ranga Ramanuja Maha Desikan**

Website: www.ramanujamission.org

# Table of Contents

**Page No.**

1. VeerAchala Sri RAmachandra SuprabhAtham ………………………. 3

2. Prapanna Navaneetham……………………………………………….. 10

3. PanchAnana PanchAmrutham…………………………………..……. 13

4. Krishna ThArakam …………………………………………………… 15

5. VAkyAnvayAdhikarana vishayaha…………………………………. 16

6. PAdukavihAra sabhA prabhAvaha …………………………………… 18

॥ श्रीः ॥



श्रीरङ्गनाथ दिव्यमणि पादुकाभ्यां नमः॥



श्रीमते वकुळभूषण महा देशिकाय नमः ॥ श्रीमते रामानुजाय नमः ॥

श्रीमते निगमान्त महा देशिकाय नमः ॥ श्रीमते गोपालार्य महा देशिकाय नमः ॥

श्रीपरमहंसपरिव्राजकाचार्यैः सर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्यैः

श्रीभगवद्रामानुज सिद्धान्तस्थापनाचार्यैः

श्रीरङ्गं श्रीमदाण्डवन् श्री रङ्गरामानुजमहादेशिकैः अनुगृहीता

# स्तोत्रावली

# Stotravali

ஸ்ரீரங்கம் ஸ்ரீமதாண்டவன் ஸ்ரீரங்கராமாநுஜமஹாதேசிகன் அருளிச்செய்த
**ஸ்ரீஸூக்திகள்**

Hymns composed by
Srirangam Srimath Andavan,
Sri Ranga Ramanuja Maha Deshikan
(Vaikashi - Thiruvadirai)

Sri Ramanuja Mission of Srirangam Srimath Andavan Asramam
Website: www.ramanujamission.org

॥ श्रीः ॥



# FOREWORD

These are a rare collection of sthothrams composed by our beloved acharya Srirangam Srimath Andavan Sri Rangaramanuja Maha Deshikan. These Srisooktis were composed by our acharya around 30 years ago in his poorvashramam. These were published in Kannada script in Bangalore around ten years ago. The same is now being published in Sanskrit to celebrate the occasion of the Thirunakshatram of our acharya.

Our Swamy's style is unique and at many places has resemblances to that of Swamy Deshikan. In a few of the compositions the first letter is highlighted. All the highlighted letters if read in a sequence gives a very special meaning pertaining to that sthothram. Also notable is the last slokam, where our Swamy uses a special variant of rhythm known as "PadachaturUrdhvAbhidam vruttam".

## Acharya Mangalam

वेदान्तलक्ष्मणमुनीन्द्र कृपात्त बोधम्

तत्पादयुग्मसरसीरुहभृंगराजम्

त्रय्यन्तयुग्म कृतपूरि परिश्रमन्तम्

श्रीरङ्गलक्ष्मणमुनिं शरणम् प्रपद्ये ॥

श्रीमते रङ्गरामानुज महा देशिकाय नमः ॥

Beseech we the holy feet of Sri Rangaramanuja who, obtained the wealth of ubhaya vedantham from Sri Thirukkudanthai Vedantha Ramanuja Maha Deshikan. Having surrendered his bharam at the feet of his acharya, he drones as a bee at his lotus feet.

**Glory to Sri Rangaramanuja Maha Deshikan**

॥ श्रीः ॥



# वीराचल श्री रामचन्द्र सुप्रभातम्

Veerachalam is a place in present day Andhra pradesh where Srimath Andavan Swamy served as a Sanskrit professor for many years. This work is sung in praise of Sri Ramar there

कौसल्यासुप्रजाराम पूर्वासन्ध्या प्रवर्तते ।

उत्तिष्ठनरशार्दूल कर्तव्यं दैवमाह्निकम् ॥१ ॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।

उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गळं कुरु ॥२ ॥

हे अम्ब सर्वजगतां हितमोददात्रि

विश्वग्विबोध हृदये विबुधेन्द्रवन्द्ये ।

प्रभ्वि प्रभोरनुमते प्रगुणैकताने

वीराद्रिनाथदयिते तव सुप्रभातम् ॥३ ॥

भक्तार्थि भंजनपरे परलोकदात्रि

मुक्तानुभाव्यमहिमे मुनिनुत्यशीले ।

मुक्तानुभाव्यमहिमे मुनिनुत्यशीले ।

कंजप्रभादवदने कमलायताक्षि

सीते शिवेशदयिते तव सुप्रभातम् ॥४ ॥

श्रुत्यन्तसिद्धसुभगौ शुभमूर्तिमन्तौ

लीलागृहीतवपुषौ ललितांघ्रिपद्मौ ।
आद्यन्तशून्यनिखिलागम दंपती वां
द्रागद्यहृद्यशुभदं सुख सुप्रभातम् ॥५ ॥

श्रीरामराम करुणालय दिव्यशार्ङ्गिन्
सद्यो विनम्र जनता शरणप्रदायिन् ।
सन्नद्ध दानव मदप्रकर प्रमापिन्
वीराद्रि राघव विभो तव सुप्रभातम् ॥६ ॥

राकानिशाकर तिरस्कृतिदक्षवक्त्र
पाकारिजादि भयदद्युमणिप्रभाव ।
नाकादिलोक जनताविनतांघ्रियुग्म
वीराद्रि राघवविभो तव सुप्रभातम् ॥७ ॥

विश्वम्भरा वसुमती विमलाग्रगण्या
वेषं पुपोष सुरभेर्भवदीक्षणाय ।
वेदास्तुवन्ति भवतो विविधाम् हि लीलाम्
वीराद्रिराघवविभो तव सुप्रभातम् ॥८ ॥

उत्तुङ्ग मङ्गल शिखा लसदुत्तुङ्गमाङ्गो
गङ्गानुषङ्ग विलसत् स्वजटामृगाङ्कः ।
अन्येच निन्युरधिकं शुभवस्तुसंघम्
वीराद्रिराघवविभो तव सुप्रभातम् ॥९ ॥

श्रीकौशिकादिमुनयश्शिवधातृमुख्याः
प्रेमानुविद्धहृदयाः प्रसमाप्य सन्ध्याम् ।
आयान्ति मुक्तिरतयो हृदयप्रसूनैः
वीराद्रिराघवविभो तव सुप्रभातम् ॥१० ॥

नन्दिस्तु नारदगतिं प्रवलम्ब्य तुङ्गो
मार्दङ्गिको भवति ते महितार्चनायै ।
ऊरूद्धवादि गणिकाः कलयन्ति लास्यं
वीराद्रिराघवविभो तव सुप्रभातम् ॥११ ॥

माध्वीकपानमनसो मधुर प्रलापाः
कीरास्समेत्यनियताः क्रमशस्स्थितास्ते ।
श्रीतोरणस्रजिसुभां रचयन्ति नित्यं
वीराद्रिराघवविभो तव सुप्रभातम् ॥१२ ॥

लक्ष्मीकटाक्षनिकटे परिवर्तनात्ते
लब्धोरुनीलगुणका लघुपत्रभृंगाः ।
शृंगार योनि नियमान्निभृतं स्वनन्ति
वीराद्रिराघवविभो तव सुप्रभातम् ॥१३ ॥

मन्दानिलोऽयममराधिपनन्दनस्थान्
मन्दार कुन्दनिवहान्मकरन्दगन्धान् ।
बृन्दारकारि विजयिन्वहति प्रणम्रो
वीराद्रि राघवविभो तव सुप्रभातम् ॥१४ ॥

प्राद्यास्त्रयः प्रहृदयाः हरिचित्ततत्त्व
श्रीभक्तिसार शठजित्परकालमुख्याः ।
तिष्ठन्ति दास्यरतयो यतिराजवर्याः
वीराद्रिराघवविभो तव सुप्रभातम् ॥१५ ॥

श्रीरङ्गपूतजगति श्रित रक्षणायै
स्वीकृत्य वेषममुकं दशधा विभिन्नम् ।
लक्ष्म्यावतेरित्थनिजाभिमतानुशक्त्या
वीराद्रिराघवविभो तव सुप्रभातम् ॥१६ ॥

मानमेय संग्रहं ह्यमानमीनतां गतस्तद्
दानव प्रदूषितन्नवदाश्च वेदमादरात्वम् ।
अब्ज योनयेतुरङ्ग रूप कन्धर प्रभोद्राग्
वीरशैल धामराम तेऽस्तु चारु सुप्रभातम् ॥१७ ॥

धराधरोऽधरीकृतोहि नस्सुधा मुधाभवेद्
दितेस्तथाऽदितेस्सुतेषु शून्यहृत्सु शोभितम् ।
दयापरोऽदधास्त्वमच्छकच्छपीयमाश्वहो
नतोऽस्मि वीरशैल राम सुप्रभातमस्तुते ॥१८ ॥

भूतजातगर्भिणीन्तु जातुयातुघातुकस्स
मोदमान मानसः प्रगृह्यलीन एव सिन्धौ ।
भूमिदार भूमिदाररूपिणा प्रतिष्ठिता सा

वीरशैल धामराम तेऽस्तु चारु सुप्रभातम् ॥१९ ॥

प्रलोल कुन्तलं शिशुन्तु भक्तितन्त्र यन्त्रितम्
विभीषयंस्थितो तस्य दारणाय कैसरम् ।
सरोषवेषमंजसा पुपोषिथ स्वयम् पुरा
नतोऽस्मि वीरशैलराम सुप्रभातमस्तुते ॥२० ॥

जगत्रयं पदत्रयेण माति केशवस्स्वयम्
ततोऽनृणो भवाम्यहन्विति व्यचिन्तयद्बलिः ।
त्रिविक्रम त्वमस्यगर्वतक्षणं तदाकरोः
नतोऽस्मि वीरशैलराम सुप्रभातमस्तुते ॥२१ ॥

दुष्टवीर्यगर्विधृष्ट भूपवर्ग पाटनं वै
तुष्टहृत्पुराचकर्थ सप्त सप्त सप्तवारम् ।
त्वं कुठारधारयैवरोषराम एव भूत्वा
वीरशैल धामराम तेस्तु चारु सुप्रभातम् ॥२२ ॥

प्रपन्न रक्षण प्रदीक्ष पंक्ति कण्ठतक्षक
स्वहस्तकत्तृणप्रयोग सूचितात्म तत्वभोः ।
सुधर्मकर्ममूलकन्द दुष्प्रमेयपात्रधृङ्
नतोस्मि वीरशैल राम सुप्रभातमस्तुते ॥२३ ॥

कोपलांगलोग्रधाटि नम्रहस्तिपत्तनस्य
यामुनादि शिक्षणप्रलोल केलि मानसस्य ।

बन्धुबृन्दनाशनेन त्यक्तयुद्धकौतुकस्य
वीरशैल धामराम तेस्तु चारु सुप्रभातम् ॥२४ ॥

व्रजांगनाभिवेष्टितोपि यस्स्वयं निरंजनो
धनंजयापदेशलोकदुग्धगीति निर्झरः ।
निहीनभृत्यतादिराजधर्मकर्मकारिणो
नतोस्मि वीरशैलराम सुप्रभातमस्तुते ॥२५ ॥

संस्कृतिं हि विहाय सर्व धर्म मार्गदूषकान्वै
सप्तितह्लुज प्रसादि सुन्दरः कृपाण पाणिः ।
भाविकल्किचारुवेष तिष्यजान्हनिष्यसि त्वम्
वीरशैल धामराम तेस्तु चारु सुप्रभातम् ॥२६ ॥

पातुं हि पापाधिषणानभवः परेश
कालप्रदेशकरण प्रविदूर सत्वान् ।
अर्चावतारविभवानुगृहीतबुद्धिः
वीराद्रिराघवविभो तव सुप्रभातम् ॥२७ ॥

सिद्धाः प्रसिद्धविभवाः शुभसाध्यसंघाः
भक्ताहि रक्तहृदयाः पितरस्समेताः ।
मुक्ताश्च नित्यविमला मुनिसार्वभौमाः
वीराद्रिराघवविभो तव सुप्रभातम् ॥२८ ॥

प्राप्योऽपि योहि जगतां सदुपायशेषी

भक्ति प्रपत्तिसुलभः परतत्वरूपः ।
लक्ष्म्यातया करुणयाच निषेव्यमाणः
वीराद्रिराघवविभो तव सुप्रभातम् ॥२९ ॥

सुप्रभातमिदं पुण्यं यः पठेत् शृणुयादपि
सुप्रभातं भवेत्तस्य रामचन्द्रकृपाबलात् ॥३० ॥

॥ श्रीः ॥



# प्रपन्न नवनीतम्

In this sthothram, the first letter of each slokam is highlighted. All the highlighted letters if read in a sequence gives a very special meaning pertaining to the sthothram

**प**द्माभिरामसुभगौ परमात्मरूपौ
नित्यानुभाव्यमहिमौ निगमान्तवेद्यौ ।
भक्तिप्रपत्तिसुलभौ परतत्वरूपौ
श्रीलोकमातृचरणौ शरणं प्रपद्ये ॥१ ॥

**रे**खारथाङ्ग सरसीरुह शंखचिह्नौ
क्षेमंकरौ हिततमौ तपनीयरूपौ ।
सर्वार्तिभंजनपरौ सकलैकबन्धौ
श्रीलोकमातृचरणौ शरणम् प्रपद्ये ॥२ ॥

**मा**नप्रमेयमितिदौ मनुजप्यशीलौ
देदीप्यमानगुणिनौ त्रिदशेन्द्रपूज्यौ ।
वेदान्तवेद्यविभवौ विहगेन्द्र वाह्यौ
श्रीलोकमातृचरणौ शरणम् प्रपद्ये ॥३ ॥

**यां**चातिपाति फलदौ यमिनां हि भाव्यौ
कंजासनादिमहितौ कमनीयवेषौ ।

षाड्गुण्यविग्रहयुतौ शमितान्धकारौ
श्रीलोकमातृचरणौ शरणम् प्रपद्ये ॥४ ॥

चक्रादिचिह्नललितौ सकलागमाद्यौ
रामावतारसमये रमणीयवेषौ ।
कान्तार संजनितकण्टकशुद्धिदक्षौ
श्रीलोकमातृचरणौ शरणम् प्रपद्ये ॥५ ॥

प्रीतिप्रसन्न हृदयाब्जमरालभूतौ
नित्यप्रपन्न परहंस निवासपद्मौ ।
भक्तार्तिभंजनविधौ परमायुधौ तौ
श्रीलोकमातृचरणौ शरणम् प्रपद्ये ॥६ ॥

तिर्यग्भिरत्रमनुजादि गणैश्च सेव्यौ
तीव्रादिभिन्नदशयाफलभेदवन्तौ ।
तत्वार्थदर्शकवरौ तपनीय वर्णौ
श्रीलोकमातृचरणौ शरणाम् प्रपद्ये ॥७ ॥

सन्यस्तयोगिसुलभावमृतस्यसेत्
संसारसागर समुत्तरणैक हेतू ।
विध्यादिदेवपदवीविनियोगसाधू
श्रीलोकमातृचरणौ शरणम् प्रपद्ये ॥८ ॥

**मा**नातिभूमिविभवौ महनीयभोग्यौ
स्तोत्रप्रियौश्श्रुतिमतां सुलभोदितार्थौ ।
तन्त्रेषु मन्त्रनिवहेषु च तुल्यरूपौ
श्रीलोकमातृचरणौ शरणम् प्रपद्ये ॥९ ॥

प्रपदन नवनीतं प्रांशुहस्तोपनीतम्
निगमचरमगीतं नीतिमार्गानपेतम् ।
निरवधिगुणजालं श्रीवराहोपहारम्
जयतु जयतु नित्यं प्राप्य पद्मासहायः ॥१० ॥

॥ श्रीः ॥



# पंचानन पंचामृतम्

विहंगमेन्द्रवाहकं विभूतियुग्मनायकम्
भुजंगतल्पशायिनं दयामयंच मायिनम् ।
विशिष्टवेषपोषकं विनम्रपापमापकम्
प्रदोषकालसंभवं नमाम माधवं हरिम् ॥१ ॥

उमाधवादिदैवतैर्युगादिसृष्टभूमिकैः
सदार्चितांघ्रिपद्मकं सपद्मकंधरान्वितम् ।
निरस्तसर्वहेयकं समस्त सद्गुणाकरम्
प्रदोषकालसंभवं नमाम माधवं हरिम् ॥२ ॥

सुवर्णनेत्रसूदकं सुपर्णगर्वपोथकम्
ज्वलत्सटावितानित प्रदीप्तनेत्र भासुरम् ।
विचित्रशक्तिमेदुरं विमानमेयरूपकम्
प्रदोषकालसंभवं नमाम माधवं हरिम् ॥३ ॥

सुयन्त्रबद्धमन्दिरं सुमन्तृसिन्धुनन्दकम्
सुदर्शनं सुदर्शकं सुषेणहेतिधारिणम् ।
सहस्रनेमिमध्यगं सदाहिसेंदिरं हितं
प्रदोषकालसंभवं नमाम माधवं हरिम् ॥४ ॥

सलक्ष्मिलक्ष्मवक्षसं सुबालवाक्यपालकम्
सदर्थतन्त्रदेशिकं कुतन्त्रयन्त्र नाशकम् ।
किरीटहारभूषितं कृपीटयोनिसेवितम्
प्रदोषकालसंभवं नमाम माधवं हरिम् ॥५ ॥

अवग्रहादिशान्त्यर्था वराहकविनाकृता
पञ्चश्लोकी सदा दद्यात् पञ्चाननकृपां पराम् ॥६ ॥

॥ श्रीः ॥

# कृष्ण तारकम्

In this sthothram, the first letter of each slokam is highlighted. All the highlighted letters if read in a sequence gives a very special meaning, i.e. "Pranava kAra" in this case.

अखिल सदन अमृतमथन असुरदमन कृष्ण

दहरमधुर सदय हृदय हिततमपद कृष्ण

विजितमदन विबुधधिषण विनतपदद कृष्ण

ऋणमिहनुद श्रुतिशतनुत हृदिममवस कृष्ण

उरगशयन तुरगवदन गरुडगमन कृष्ण

कनकवसन कमलनयन कुगतिशमन कृष्ण

सुगुणभवन नरकमथन मुदितभजन कृष्ण

ऋणमिहनुद श्रुतिशतनुत हृदिमम वस कृष्ण

मनुजपहित वरगतियुत दमितदनुज कृष्ण

नतजनधन नगवरधर भवभयहर कृष्ण

प्रकृतिपरम चरमशरण चरणसुखद कृष्ण

ऋणमिहनुद श्रुतिशतनुत हृदिममवस कृष्ण

मुमुक्षुणा मया कृष्ण सतारं रुदितं सदा

ऋणबन्ध भवेभ्यश्च मां पालय सुहृद्भव ॥

॥ श्रीः ॥

# वाक्यान्वयाधिकरण विषयः

मैत्रेयीब्राह्मणाभ्यां गदित इहपुमान् सांख्यातत्वप्रसिद्धः
ईशोवात्मेतिशङ्का पतिसुतवनिताभोग्यभोक्तृत्वयोगात्।
साक्षादुत्पन्तिनाशन्नभवति परमः तन्त्रसिद्धः पुमांस्यात्
द्रष्टव्यश्चात एव प्रकृतिविरहितस्सोमृतत्वादिहेतुः ॥१॥

तस्मिन् वेदान्तवेद्ये भवति जगदुपदानहेतुः प्रधानम्
प्राप्ते ब्रूमो न जीवः पर इह कथितः कृस्न वाक्यान्वयित्वात्।
पत्यादीनां प्रियत्वं निरवधिकगुणब्रह्मसङ्कल्पवृत्तम्
वाच्ये जीवे निजार्थप्रहतिरपि निजासंमतार्थावतारः ॥२॥

एतद्भूतानुनाशः कथमिहघटते जीवसंगीतिपृष्टे
प्राप्तं ब्रह्माभिधाने त्रिमुनिनिगदितं जीववाच्यात्मशब्दात्।
व्यक्त्यैक्यादाश्मरथ्यः श्रुतिशतविमतं कार्यहेत्वोरभेदम्
मत्वा सर्वज्ञतायै निजगदनितरां तत्प्रतिज्ञानुरूपम् ॥३॥

उत्क्रान्तिं प्राप्यजीवो निरुपधिकदशाद्वैतभावं गतस्यात्
तस्मात्तच्छब्दवाच्यः परम इहभवेदित्यसावौडुलोमिः।
मेने तद्भेददृष्टेरतिपतितसृतेस्साम्यसाधर्म्यशब्दात्
तत्तत्कल्पासहत्वान्मतमितिकिलतत् प्राह यत्काशकृत्स्नः ॥४॥

तस्थत्वात् द्वारवृत्या वदतिपरममित्यात्मशब्दो विबाधम्
जीवस्यानुप्रवेशेप्यधिकरणमिवावस्थितेस्तत्प्रसिद्धम् ।
एवं सर्वात्मकत्वं श्रुतिगणविषयः काशकृत्स्नेनसूक्तम्
नैतद्भिन्नाशयोऽतः परिमिह कथितः सूत्रकृन्मोदकारी ॥५ ॥

श्रुतप्रकाशिकाचार्य श्रुत्यन्ताचार्य भाषितान् ।
आलोच्य च यथाभाष्यं कृताह्येते सतां मुदे ॥६ ॥

॥ श्रीः ॥



# पादुकाविहारसभा प्रभावः

This was composed by our Swamy on the greatness of PadukA vihAra sabha conducted regularly. It was the 29th sabha on which he wrote this work and some mathematics in the slokams enshrined in this sthothram yield the number 29. In the last slokam, Swamy uses a special variant of rhythm known as "PadachaturUrdhvAbhidam vruttam".

श्रीमत् श्रीरङ्गनाथाह्वयमुनिकृपया प्राप्तसत्योदया सा
श्रीमद्वेदान्तरामानुजयतिकरुणालब्धनित्यातिभूमा ।
श्रीमच्छ्रीरङ्गराजांघ्रिप विहृतिपरा नित्यमानंददात्री
भूयोभूयोहि भूयाद्द्विगुणगुणिता सारदा सद्गुणज्ञा ॥

जगत्रयहितैषिभिर्महितमान्यविद्वद्वरैः
मुनित्रयमनीषिभिर्विदित वृत्तिभिर्वर्धिता ।
पदत्रयविहारिणा निखिलपापनुद्रङ्गिणा
नतत्रिदशसङ्गिना निगमवृन्द्र संमोदिना ॥

रङ्गराजपदपङ्कजाश्रिता पादपाविहृतिपूरपासभा
मोदमानबहुवादि कोविदा एधतांहि नितरां सदामुदा ॥

धरां गताहि संख्यायां बुधधाराधरैस्सदा ।
इयं धरायां लसतु मीमांसा सस्यमेदुरा ॥

निगमविद्यानिवहे ८

विचारचातुरीमरंदझरीपाः । १२

विलसन्तु विपश्चिदपश्चिमाः गताभ्यसूयाः १६

विरिंचिप्रपंचांचितमंजुविपंचीरणनवाग्विलासाः ॥२० पदचतुरूर्ध्वाभिधं वृत्तम्